## संस्कृतम्

# अभ्यासपुस्तकम्

## षष्ठी कक्ष्या

## സംസ്കൃതം

# അഭ്യാസപുസ്തകം

## ക്ലാസ് 6

സംസ്കൃതവിഭാഗം

**പൊതുവിദ്യാഭ്യാസവകുപ്പ്**

കേരള സർക്കാർ

2017

नाम ..........................................................................

संस्कृतम्
STD - VI
प्रथमः पाठः - **मामकदेशः**

## ➺ *मातृकानुसारं पदच्छेदं लिखत।*

| | | |
|---|---|---|
| सुन्दरदेशोऽयम् | - | सुन्दरदेशः + अयम् |
| केरलदेशोऽयम् | - | केरलदेशः + अयम् |
| ग्रामोऽयम् | - | .................................................. |
| भक्तोऽयम् | - | .................................................. |
| अध्यापकोऽयम् | - | .................................................. |
| पण्डितोऽयम् | - | .................................................. |
| अपूर्णोऽभवत् | - | .................................................. |
| दुःखितोऽयम् | - | .................................................. |
| कोऽपि | - | .................................................. |
| खगोऽपि | - | .................................................. |
| उत्सुकोऽहम् | - | .................................................. |
| सोऽपि | - | .................................................. |
| इतोऽपि | - | .................................................. |
| विश्वेऽस्मिन् | - | .................................................. |
| अन्यायोऽपि | - | .................................................. |
| प्रयत्नोऽपि | - | .................................................. |
| रक्षाहीनोऽपि | - | .................................................. |
| प्रयुक्तोऽयम् | - | .................................................. |
| सिंहोऽत्र | - | .................................................. |
| बालोऽस्ति | - | .................................................. |
| स्नेहस्त्यागः | - | स्नेहः + त्यागः |
| दीपस्तु | - | .................................................. |
| मार्गस्तु | - | .................................................. |
| देशस्तु | - | .................................................. |
| स्यूतस्तु | - | .................................................. |

नाम ..........................................................................

**संस्कृतम्**
STD - VI
प्रथमः पाठः - **मामकदेशः**

| | | |
|---|---|---|
| भेकस्तु | - | .............................................................................................. |
| मेघस्तु | - | .............................................................................................. |
| संघैरपि | - | संघैः + अपि |
| मित्रैरपि | - | .............................................................................................. |
| शक्तैरपि | - | .............................................................................................. |
| बहिरपि | - | .............................................................................................. |
| पुनरपि | - | .............................................................................................. |
| ज्योतिरपि | - | .............................................................................................. |
| तथापि | - | तथा + अपि |
| यथापि | - | .............................................................................................. |
| विनापि | - | .............................................................................................. |
| कदापि | - | .............................................................................................. |
| निवसत्येकमनाः | - | निवसति + एकमनाः |
| गच्छत्येकमनाः | - | .............................................................................................. |
| भवत्येकम् | - | .............................................................................................. |
| निवसत्येव | - | .............................................................................................. |
| खादत्ययम् | - | .............................................................................................. |
| धर्मो दानम् | - | धर्मः + दानम् |
| मेघो गर्जति | - | .............................................................................................. |
| बालो हसति | - | .............................................................................................. |
| धर्मो रक्षति | - | .............................................................................................. |
| मृगो धावति | - | .............................................................................................. |
| अपृष्टो भाषते | - | .............................................................................................. |
| ह्याधारः | - | हि + आधारः |
| यद्यपि | - | यदि + अपि |
| गच्छत्यन्ते | - | .............................................................................................. |

नाम ..........................................................................

प्रवहत्यनवरतम् - ..........................................................................

जीवत्यनाथः - ..........................................................................

➢ ***कवितां परिवर्त्य लिखत।***

भारतदेशो मामकदेशः सुन्दरदेशोऽयम्।
पुण्यपुरातनसंस्कृतिधारा प्रवहत्यनवरतम्।

केरलराज्यं मदीयराज्यं सुन्दरराज्यमिदम्।
पुण्यपुरातनपम्पाधारा प्रवहत्यनवरतम्।।

सुन्दरं शीतलं सौम्यं मन्दारं जाति मल्लिका।
श्वेतवर्णेन शोभन्ते उद्यानं चारुदर्शनम्।।

(शोभनम्, पाटलम्, भासन्ते)

..........................................................................
..........................................................................
..........................................................................
..........................................................................

नाम ........................................................................

*अधो दत्तम् आशयं पठित्वा समानाशयपङ्क्तीः चिनोतु।*

**संस्कृतभाषा पुरातनभाषा भवति।**

..........................................................................................................................

**संस्कृतभाषा मुख्या मधुरा भवति।**

..........................................................................................................................

..........................................................................................................................

**वनशोषणं पारिस्थितिकदोषस्य कारणम्।**

..........................................................................................................................

..........................................................................................................................

⇒ भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।

⇒ तस्यां हि काव्यं मधुरं तत्रापि च सुभाषितम्।।

⇒ पारिस्थितिकदोषाय कल्पते वनशोषणम्।

⇒ तन्निवारयितुमाद्यं यत्नः कार्यो निरन्तरम्।।

⇒ पुण्यपुरातनसंस्कृतिधारा

नाम ..........................................................................

### ➩ *उदाहरणानुसारं विग्रहवाक्यं लिखत।*

शूरस्य भावः - शौर्यम्
पातुम् इच्छा - ..........................................................
दुष्टा दशा - ..........................................................
भोक्तुम् इच्छा - ..........................................................
शिशोः भावः - ..........................................................
देशस्य भक्तम् - ..........................................................
वृक्षस्य मूलम् - ..........................................................

( बुभुक्षा, जिज्ञासा, वृक्षमूलम्, पिपासा, शैशवम्, देशभक्तम्, दुर्दशा)

ग्रामे भवः - ग्रामीणः, तान् - ग्रामीणान्।
भारते भवः - भारतीयः, तान् - ..........................................................
केरले भवः - केरलीयः, तान् - ..........................................................

(केरलीयान्, भारतीयान्)

राज्यस्य सीमा राज्यसीमा, तस्याम् - राज्यसीमायाम्
ग्रामस्य सीमा ग्रामसीमा, तस्याम् - ..........................................................
श्रेयः करोति इति - श्रेयस्करम्
जले जायते इति - ..........................................................
वारि ददाति इति - ..........................................................
भुवं पालयति इति - ..........................................................
अम्बुं ददाति इति - ..........................................................

(भूपालः, वारिदः, अम्बुदः, जलजम्)

नाम ..........................................................................

➢ ***उदाहरणानुसारं लिखत।***

| | | |
|---|---|---|
| वसति स्म | - | अवसत् |
| पठति स्म | - | अपठत् |
| गच्छति स्म | - | ........................................................... |
| लिखति स्म | - | ........................................................... |
| चलति स्म | - | ........................................................... |
| धावति स्म | - | ........................................................... |
| पिबति स्म | - | ........................................................... |
| करोति स्म | - | ........................................................... |

➢ ***मञ्जुषातः अव्ययानि चित्वा यथोचितं योजयत।***

| **क्त्वान्तम्** | **ल्यबन्तम्** | **तुमुन्नन्तम्** |
|---|---|---|
| गत्वा | निलीय | पातुम् |
| .................................. | .................................. | .................................. |
| .................................. | .................................. | .................................. |
| .................................. | .................................. | .................................. |
| .................................. | .................................. | .................................. |
| .................................. | .................................. | .................................. |

(भवितुम्, आगत्य, गन्तुम्, विज्ञाय, ज्ञातुम्, अनुभूय, भूत्वा, पठित्वा, प्रपठ्य, पठितुम्, ज्ञात्वा, गृहीत्वा)

नाम ..........................................................................



### ➢ *कथास्तम्भं क्रमीकरोतु।*

१. सीमारक्षणाय सैनिकानां दौर्लभ्यम् अभवत्।
२. भवन्तः एकैकं युवानम् अवश्यं देशरक्षायै प्रेषयतु।
३. तस्याः चत्वारः पुत्राः आसन्।
४. पुरा काश्मीरेषु नन्दिनीदेवी नामिका काचित् ग्रामीणा वसति स्म।
५. एकदा राज्यसीमायां कलहोऽभवत्।

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

### ➢ *पाठभागं पठित्वा उत्तराणि लिखत।*

१. नन्दिनीदेवी कुत्र वसति स्म? ..........................................
२. तस्याः कति पुत्राः आसन्? ..........................................
३. राज्यसीमायां किम् अभवत्? ..........................................
४. ग्राममुख्यः किम् अवदत्? ..........................................
५. देशरक्षायै ग्राममुख्येन निर्दिष्टः उपायः कः? ..........................................
६. ग्राममुख्यस्य आदेशानुसारं नन्दिनीदेवी प्रथमं कं प्रैषयत्? ..........................
७. नन्दिनीदेवी पुत्रान् आहूय किम् अवदत्? ..........................................
८. नन्दिनीदेवी कदा रोदितुम् आरभत? ..........................................
९. नन्दिनीदेव्याः रोदनस्य कारणं किम्? ..........................................
१०. कति पुत्रान् नन्दिनीदेवी देशरक्षायै प्रैषयत्? ..........................................

नाम ........................................................................



*उदाहरणानुसारं क्रियापदं परिवर्त्य लिखत।*

| **क्रियापदानि** | **क्तवतु प्रत्ययान्तः पुल्लिङ्गः** | **क्तवतु प्रत्ययान्तः स्त्रीलिङ्गः** |
|---|---|---|
| अगच्छत् | गतवान् | गतवती |
| अपतत् | पतितवान् | पतितवती |
| अपिबत् | | पीतवती |
| अपृच्छत् | पृष्टवान् | |
| लिखितवान् | | |
| अहसत् | | हसितवती |
| | पठितवान् | |
| अवदत् | | उक्तवती |
| अकरोत् | कृतवान् | |
| अयच्छत् | | दत्तवती |
| अपश्यत् | दृष्टवान् | |
| | श्रुतवान् | श्रुतवती |
| | पालितवान् | |

नाम ..........................................................................

*उचितैः क्तवत्वन्तरूपैः पूरयत।*

बालकः विद्यालयं गतवान्।
बालिका विद्यालयं ..........***गतवती***...............। (गतवती)

अर्चकः मन्दिरं गतवान्।
महिला मन्दिरं ................................................।

छात्रः फलरसं पीतवान्।
विद्यार्थिनी जलं ................................................ ।

रामः गीतं पठितवान्।
रमा गीतं ................................................ ।

सीता वनं गतवती
लक्ष्मणः वनं ................................................।

सुरेशः नाटकं दृष्टवान्
मालविका चलनचित्रं ................................................ ।

रमा पत्रं लिखितवती।
नटेशः लेखं ................................................।

बालिका गीतं श्रुतवती।
बालकः गीतं ................................................ ।

कीर्तना संस्कृतं पठितवती।
राहुलः संस्कृतं ................................................ ।

नाम ..............................................................................

### *मातृकानुसारं पदच्छेदं लिखत।*

| | | |
|---|---|---|
| नास्त्येव | - | न + अस्ति + एव। |
| मित्रमेवाहम् | - | .............................................................................. |
| दर्पोऽभिमानश्च | - | .............................................................................. |
| कामप्यनाथाम् | - | .............................................................................. |
| पुनरप्यकथयत् | - | .............................................................................. |
| त्वमपराधमकरोः | - | .............................................................................. |
| इत्यहमपृच्छम् | - | .............................................................................. |
| स्थितास्तीति | - | .............................................................................. |

### *विज्ञापनपत्रलेखनम्*

***विज्ञापनपत्रम्***

अनन्तपुरम्
०२/०३/२०१६

**जनाः स्वस्थाः भवन्तु।**

महात्मन् !

स्वस्थाः जनाः राष्ट्रस्य सम्पदः इति विषयमधिकृत्य अनन्तपुरं स्वास्थ्यकेन्द्रस्य साम्मुख्ये २०१६ मार्च्मासस्य पञ्चमे दिने सायं चतुर्वादने विचारसत्रमायोजयति। तदवसरे भोजने निष्ठा, मितत्वपालनम्, भोजनात्पूर्वं हस्तप्रक्षालनस्य आवश्यकता, भक्षणं, व्यायामः च प्रधानम् इत्यादिकविषये चर्चा भविष्यति।

भवतां सान्निध्यं सहकरणं च निमन्त्रये
भवदीयः

कार्यदर्शी
स्वास्थ्यकेन्द्रम्
अनन्तपुरम्।

नाम ..........................................................................

भारतीयदर्शनेषु अतिविशिष्टं भवति योगदर्शनम्। षड्दर्शनेषु अन्यतमस्यास्य प्रणेता भवति पतञ्जलिमहर्षिः। तेन रचितः ग्रन्थः भवति योगसूत्रम्। तस्मिन् चत्वारोऽध्यायाः सन्ति। तत्र षण्णवत्युत्तरशतं (१९६) सूत्राणि विद्यन्ते। योगशास्त्रे यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाणि अष्टाङ्गानि कल्पितानि।

➢ ***उपरि दत्तां खण्डिकां पठित्वा आशयान् संयोज्य एकं विज्ञापनपत्रं रचयत।***

***योगदिनाचरणम्***

नाम .......................................................................


संस्कृतम्
STD - VI
तृतीयः पाठः - **स्वास्थ्यमस्तु नः**

## ➢ *पट्टिकां करोतु*

( योगासनं करोमि, अनावृतं भक्षणं खादामि, आसनं गात्रसौख्याय, भोजनात्पूर्वं हस्तप्रक्षालनं न करोमि, स्वच्छं गृहाङ्गणम्, परिस्थितिं न संरक्षामि।)

| ***उचितम्*** | ***अनुचितम्*** |
| --- | --- |
| दन्तधावनं करोमि | प्रतिदिनं स्नानं न करोमि |
| ................................ | ................................ |
| ................................ | ................................ |
| ................................ | ................................ |

## ➢ *पादटिप्पणीं लिखत।*



................................



................................



................................



................................

अवकरिकायां मालिन्यानि निक्षिपति, दन्तधावनं करोति, जलं पिबति, सस्यानि सिञ्चति)

➢ ***सम्भाषणं पठित्वा अन्नदोषमधिकृत्य लघुटिप्पणिं लिखत।***

अनिलः - नमस्ते! सुरेश!

सुरेशः - नमस्ते! कुतः आगच्छति?

अनिलः - अन्नदोषमधिकृत्य संगोष्ठ्यां भागं गृहीत्वा आगच्छामि।

सुरेशः - भक्षणविषये का चर्चा?

अनिलः - अन्नदोषैः रोगाः जायन्ते।

सुरेशः - अन्नदोषाः के?

अनिलः - अनावृतभक्षणखादनम्, अमितम् अहितं च भक्षणम्, पर्युषितस्य भक्षणस्य उपयोगः, विरुद्धाहाराणाम् उपयोगः च अन्नदोषाय भवन्ति।

सुरेशः - अन्नदोषैः के के रोगाः जायन्ते?

अनिलः - उदरवेदना, ज्वरः, इत्यादि सर्वरोगाणां मूलकारणम् अन्नदोषः एव।

सुरेशः - एवं वा? तर्हि भक्षणकार्ये निष्ठां पालयामि।

अनिलः - उत्तमम्। भक्षणशुचित्वे अपि श्रद्धा कार्या।

सुरेशः - धन्यवादः।

अनिलः - धन्यवादः।

नाम ..................................................................................

**_मञ्जूषातः पदानि चित्वा यथोचितं योजयत।_**



..................................... वासः



..................................... स्वापः



..................................... चालनम्



..................................... गच्छन्ति।

का सा? जानासि चेद्वद। .....................................




दण्डसाहाय्येन , जले , नौका , जनान् निवेश्य , स्थले ,


नाम ..............................................................................



➾ ***मञ्जूषातः पदानि चित्वा यथोचितं योजयत।***



........................................शेते



........................................धावति।

........................................



(रज्जुः , आलाबुः , ऋषभः)

पाणिहीनस्तथा पादहीनः
भीमोदरोऽयं जलं पिबति।

उद्याने तिष्ठन्तीं सुन्दरीं पश्य
स्पर्शनमात्रे स्वापमुमैति।

मामकोद्याने सुमानि सन्ति
नाहं गणयितुं पारयामि।



........................................




........................................




........................................

एकस्मिन् पात्रेऽस्मि तैलद्वयम्

जनको वृषभं क्रीत्वागतवान्
वन्दनसमये नास्ति शिरः।



........................................



........................................

(लज्जावती, अण्डः, घटः, आकाशे नक्षत्राणि, कच्छपः)

नाम ......................................................................

## ➩ *कोष्ठकस्थस्य पदस्य उचितरूपेण पूरयत।*

(सह, समं, साकं, सार्धं, सहितम्)

१. बालकः (पिता) .............***पित्रा***............. साकं मन्दिरम् अगच्छत्।

२. बालिका (माता) ...................................... सहितं विद्यालयम् अगच्छत्।

३. शिशुः (पिता) ...................................... सहितं मन्दिरं गतवान्।

४. अनिलः (मित्रम्) ...................................... सह गृहं गतवान्।

५. जनकः (पुत्रः) ...................................... समम् आपणं गतवान्।

६. रामः (लक्ष्मणः) ...................................... सह वनम् अगच्छत्।

७. सीता (रामः) ...................................... सह वनम् अगच्छत्।

८. बालिका (जननी) .......**जनन्या**....... सार्धम् आतुरालयम् अगच्छत्।

९. अनिलः (भगिनी) ...................................... सह मातुलगृहं गतवान्।

१०. रमेशः (पत्नी) ...................................... साकं कार्यालयं गतवान्।

नाम ..........................................................................

संस्कृतम्
STD - VI
पञ्चमः पाठः - **नीतिबोधः**

➢ *लकारपरिज्ञानम् - क्रियारूपाणि चित्वा पट्टिकायां निवेशयत।*

| **वर्तमानकालः (लट्)** | **भूतकालः (लङ्)** |
| --- | --- |
| दर्शयति | अदर्शयत् |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |
| ...................................... | ...................................... |

(पठति, अपिबत्, अपठत्, पिबति, अक्रीडत्, अधावत्, चलति, धावति, क्रीडति, अचलत्, गच्छति, लिखति, अगच्छत्, अलिखत्, अभवत्, भवति, खादति, अखादत्, अवदत्, वदति)

नाम ..............................................................................

संस्कृतम्
STD - VI
षष्ठः पाठः - **विदुरवचनम्**

➢ ***आशयं पठित्वा उचितं श्लोकं चित्वा लिखतु।***

मानवः दुर्जनं मित्रं गणयति, मित्रं निन्दति, दुष्कर्म प्रारभते च तं नरं जनाः मूढचेतसं कथयति।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

यस्य कृत्यं न विघ्नन्ति
शीतमुष्णं भयं रतिः।
समृद्धिरसमृद्धिर्वा
स वै पण्डित उच्यते।।

अनाहूतः प्रविशति
अपृष्टो बहुभाषते।
विश्वसत्यप्रमत्तेषु
मूढचेताः नराधमः।।

अमित्रं कुरुते मित्रम्
मित्रं द्वेष्टि हिनस्ति च।
कर्म चारभते दुष्टं
तमाहुर्मूढचेतसम्।।

नाम ..............................................................................

**आशयान् पठित्वा उचितान् श्लोकान् मञ्जूषायां लिखत।**

नयनेन हृदयेन वाण्या प्रवर्तनेन च चतुर्धा यः नरः जनान् तोषयति तं नरं जनः अनुतोषयति।

..............................................................................
..............................................................................
..............................................................................
..............................................................................

यः नरः आमन्त्रणं विना प्रविशति, प्रश्नान् विना अधिकं वदति, अधिकप्रमत्तेषु विश्वासमर्पयति तादृशः नीचमनुष्यः मन्दबुद्धिः भवति।

..............................................................................
..............................................................................
..............................................................................
..............................................................................

ये नरा अप्राप्यं नेच्छन्ति नष्टे विषये विपत्तिषु च दुःखं न प्रकटयन्ति तादृशाः मानवाः एव धीमन्तः भवन्ति।

..............................................................................
..............................................................................
..............................................................................
..............................................................................

अनाहुतः प्रविशति
अपृष्टो बहुभाषते।
विश्वसत्यप्रमत्तेषु
मूढचेता नराधमः।।

चक्षुषा मनसा वाचा
कर्मणा च चतुर्विधम्।
प्रसादयति लोकं य-
स्तं लोकोऽनुप्रसीदति।।

नाप्राप्यमभिवाञ्छन्ति
नष्टं नेच्छन्ति शोचितुम्।
आपत्सु च न मुह्यन्ति
नरा पण्डितबुद्धयः।।

नाम ........................................................................

## ➢ *शलोकं पठित्वा प्रश्नानाम् उत्तरं लिखत।*

अमित्रं कुरुते मित्रम्
मित्रं द्वेष्टि हिनस्ति च।
कर्म चारभते दुष्टं
तमाहुर्मूढचेतसम्।।

१. मूढचेताः कं मित्रं गणयति? ........................................................................

२. कः मित्रं निन्दति? ........................................................................

३. मूढचेताः कीदृशं कर्म प्रारभते? ........................................................................

## ➢ *मञ्जूषायां दत्तानि वाक्यानि यथास्थानं योजयत।*

आमन्त्रणं विना प्रविशति।
प्रश्नान् विना अधिकं वदति।
अधिकप्रमत्तेषु विश्वासम् अर्पयति।

शैत्यं सोढ्वा कर्म करोति।
उष्णं विगणय्य कर्म करोति।
भयं विना कर्म करोति।
लैकिकविषयेषु आसक्तिं न प्रकटयति।
समृद्धिषु असमृद्धिषु च समानतया कर्म करोति।

दुर्जनं मित्रं गणयति।
मित्रं निन्दति।
दुष्कर्म प्रारभते।

प्राप्तुम् असाध्यं न इच्छन्ति।
नष्टे विषये दुःखं न प्रकटयति।
विपत्तिषु दुःखं न प्रकटयति।

नाम ..................................................................

षष्ठः पाठः - **विदुरवचनम्**

पण्डितः

..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................

एतादृशाः मानवाः एव पण्डिताः भवन्ति।

धीमन्तः

..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................

एतादृशाः जनाः धीमन्तः भवन्ति।

मूढः

..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................

एतादृशः जनः मूढः भवति।

नराधमः

..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................
..............................................................................

एतादृशः जनः नराधमः भवति।

नाम ........................................................................

### ➢ *उचितम् उत्तरं चित्वा लिखत।*

कं जनाः अनुतोषयन्ति?

....................................................................................................................................

....................................................................................................................................

....................................................................................................................................

यः नयनेन हृदयेन वाण्या प्रवर्तनेन च जनान् तोषयति।

यः अप्राप्यं न इच्छति, नष्टविषयेषु विपत्तिषु दुःखं न प्रकटयति।

यः शैत्यं तापः भयं लैकिकविषयेषु आसक्तिः सम्पत् दारिद्र्यं वा विगणय्य कर्म करोति।

नाम ........................................................................



➭ ***भवतां विद्यालयस्य चरित्रलेखनाय पूर्वं वरिष्ठेन ग्राममुख्येन सह अभिमुखसम्भाषणाय प्रश्नावलीं निर्मात।***

विद्यालयस्य नाम केरलपुरं माध्यमस्तरविद्यालयः। विद्यालयः कोषिक्कोट् जिल्लायां वर्तते। विद्यालयस्य आरम्भः १९८० तमे वर्षे अभवत्। विद्यालयस्य प्रथम प्रथमाध्यापिकायाः नाम राधा इति। प्रथमछात्रस्य नाम फैसल् इति। ग्रामीणछात्राणां पठनाय विद्यालयस्य आरम्भः अभवत्। श्रीनारायणगुरुमहाभागस्य प्रेरणया ग्रामीणाः मिलित्वा विद्यालयस्य आरम्भं कृतवन्तः।

इदानीं विद्यालये २५० छात्राः १० अध्यापकाः च सन्ति। इदानीं प्रथमाध्यापिकायाः नाम आन्सी इति। विविधग्रामेभ्यः अपि छात्राः आगच्छन्ति। विविधेषु कला-कायिकादिषु मण्डलेषु विद्यालयः उन्नतस्थाने विराजते।

सूचकाः - (विद्यालयस्य नाम, विद्यालयस्य आरम्भः, प्रथमाप्रथमाध्यापिका, प्रथमछात्रः, किं, कुत्र, कति, कदा, कुतः, कथं, किमर्थम्)

...............................................................................................

...............................................................................................

...............................................................................................

...............................................................................................

...............................................................................................

...............................................................................................

...............................................................................................

...............................................................................................

नाम ..........................................................................

सप्तमः पाठः - **शास्त्रोपासकः अच्युतप्पिषारटिः**

## *वर्षाणि संख्याभिः लिखत।*

| | | |
|---|---|---|
| पञ्चाशदधिकनवशतोत्तरसहस्रम् | - | ..........**१९५०**.......... |
| नवत्यधिकनवशतोत्तरसहस्रम् | - | .................................... |
| द्विसहस्रम् | - | .................................... |
| दशाधिकद्विसहस्रम् | - | .................................... |
| सप्तदशाधिकद्विसहस्रम् | - | .................................... |
| द्वानवत्यधिकनवशतोत्तरसहस्रम् | - | .................................... |
| पञ्चाशदधिकपञ्चशतोत्तरसहस्रम् | - | .................................... |
| नवदशधिकनवशतोत्तरसहस्रम् | - | .................................... |
| पञ्चाधिकाष्टशतोत्तरसहस्रम् | - | .................................... |
| चतुःपञ्चाशदधिकाष्टशतोत्तरसहस्रम् | - | .................................... |

## *वर्षाणि अक्षरैः लिखत।*

| | | |
|---|---|---|
| १८५८ | - | ..........**अष्टपञ्चाशदधिकाष्टशतोत्तरसहस्रम्।**.......... |
| १७५४ | - | .................................... |
| १९४७ | - | .................................... |
| २००५ | - | .................................... |
| १२५ | - | .................................... |
| १९२१ | - | .................................... |
| १९५६ | - | .................................... |
| १९५० | - | .................................... |
| १९३२ | - | .................................... |
| १६०४ | - | .................................... |
| १६५६ | - | .................................... |

नाम ....................................................................

***अधोदत्तानि वाक्यानि पठित्वा रेखाङ्किकतपदस्य उचितं प्रश्नवाचकशब्दं निर्धार्य लिखत।***

1. ब्रह्मसभायाः स्थापकः इति प्रसिद्धः <u>श्री राजाराममोहनः</u>। (कः, किम्, कुत्र)

....................................................................

2. सः <u>वंगेषु बर्द्वान्</u> जनपदे भूजातः। (कति, कुत्र, कथम्)

....................................................................

3. सः <u>१७७२ मेय् मासस्य द्वाविंशे दिने</u> अजायत। (कथम्, किमर्थम्, कदा)

....................................................................

4. राजाराममोहनः स्वजीवितं <u>समाजपरिवर्तनाय</u> समर्पितवान्। ( कथम्, किमर्थम्, कदा)

....................................................................

5. सः <u>भौतिकसम्पदं विज्ञानप्रभां च प्रवर्धयितुं प्रसारयितुं च</u> १८२८ तमे ब्रह्मसभां स्थापयामास। ( कथम्, किमर्थम्, कदा)

....................................................................

6. राजाराममोहनस्य प्रयत्नेन <u>विल्ल्यं बेन्टिक् प्रभु</u> सतीं निरोधितवान्। (कः, कम्, कथम्)

....................................................................

नाम .......................................................................

सप्तमः पाठः - **शास्त्रोपासकः अच्युतप्पिषारटिः**

➢ ***अधो दत्तप्रश्नवाचकशब्दान् उपयुज्य अभिमुखार्थं प्रश्नावलिं निर्मात।***

***अहं रमेशः***

अहं रमेशः। मम गृहे माता पिता मातामही सोदरी च सन्ति। अहं प्रातः पञ्चवादने उत्तिष्ठामि। मम विद्यालयः गृहस्य समीपे एव अस्ति। अतः अहं गृहात् विद्यालयं गच्छामि। अहं सायंकाले वाचनार्थं गन्थालयं गच्छामि।

किम्
कुत्र
